नं० १३११-घ

ईश्वरे नित्यसुखस्थापनविचारः

नं० १३११-घ

११०

१०९

ग्रिंरे निपहुनत्व व्यवस्थापनीबाबा

१६॰ वा॰

नसुखवत्वे॰२

श्रीगणेशायनमः॥ ईश्वरःसुखवान्नवेतिविप्रतिपत्तिः॥ अत्रप्राञ्चः [redacted]॥ ईश्वरोनसुखवान्सुखसामग्र्यभावादिति॥ तथाहि धर्मोसुखस [redacted]
२ दुःखमि तिदर्शनात्। धर्मत्वेनैवकार्यकारणभावः॥ लाघवात्। तथाचधर्माभावादीश्वरेसुखबाधितमिति॥ नचवाजपेयादिविजातीय
पूर्वाणांविजातीयस्वर्गहेतुत्वकल्पना सामान्यतोधर्मत्वेनसुखत्वेनकार्यकारणभावेमाभाव इतिवाच्यं॥ यद्विशेषयोःकार्य
कारणभावो असतिबाधकेतत्सामान्ययोरपीति [redacted] व्याप्तिबलात्तत्सिद्धेः॥ स्वव्यापार [redacted] द्वारावाजपेया [redacted] देरेवविलक्षणसुखादिजनकत्वेनातिप्रसंगभंगेवाजपेयजन्यविजातीयधर्मत्वेनविजातीयसुखत्वेनकार्यकारणभावेमानाभावाच्च॥ तादृश
व नचवाजपेयादीनांविहितत्वेनैवरूपेण स्वर्गादिजनकत्वं वाजपेयजन्यविजातीयापूर्वाणांतु लाघवात् [redacted] मवायेनविजाती
यस्वर्गजनकत्वमितितेनैवातिप्रसंगभंगइतिस्वजन्यव्यापारद्वारावाजपेयादीनांविजातीयस्वर्गहेतुत्वेव्यापारत्वादिप्रवेशेनगौर
किंच वं॥ नचैवंसतिविनिगमनाविरहात्तद्विजातीयापूर्वाणांतत्वेनहेतुत्वे [redacted] धर्मत्वेनसुखत्वेनकार्यकारणभावेमानाभाव [redacted] इति
वाच्यं। वाजपेयेनेत्यत्रतदुपस्थापितवाजपेयत्वादिनैववेदेनेष्टसाधनत्वबोधेस्यविनिगमकत्वात्। पदस्याभाव्यात्॥ अतए
वदंडोघटकारणमित्यादिपदात्दंडत्वाघवच्छिन्नघटकारणत्वबोधोऽनुभवसिद्ध इति॥ नचस्वव्यापारद्वारादस्यसंबंधपर्यवसानेनसंबंध [redacted] ॥२॥

गौरवस्य बहुतरकार्यकारणभावेषु कल्पनापत्तेरिति वाच्यं। तत्रापि व्यापारत्वाप्रवेशात्। विजातीयापूर्वत्वेनैव संबंधत्वात्। न हि स
द् मवायापूर्वयोरणुरपि लाघवगौरवविशेषः। न च सत्यं विज्ञानमानंदं ब्रह्मेति आनंदो ब्रह्मेति [illegible]त्यादिश्रुतिभिरीश्वरे आनंदबा
धात्सिद्धिरिति वाच्यं। तत्रानंदपदेनानंदजनक[illegible]स्यैव दुःखाभाव[illegible]स्यैव बोधनात्। विज्ञानानंदयोः ब्रह्मरूपभेदबाधस्य
श्रुतिस्वरससिद्धस्य चेश्वरे नित्यसुखस्वीकारेणैवोपपादयितुमशक्यत्वाच्च। न ज्ञानानंदयोरभेदबाधाद्वनित्यज्ञानानंद
वत्त्वेन लक्षणेति चेन्न। तथा सति नित्यानंदबाधादानंदसामान्यबाधाद्वा पूर्वरीत्या आनंदजनकदुःखाभाववति लक्षणायास्य
५ वक्तुं शक्यत्वादित्याहुः॥ नवीनास्तु ईश्वरः सुखवान् सुखवत्त्वेन वेदबोधितत्वात्। तथाहि विज्ञानमानंदं ब्रह्म इत्यादिकाः श्रुतयो ज्ञानानं नित्य
दयोरभेदस्य बाधात् लक्षणयेश्वरे नित्यज्ञानानंदवत्त्वं बोधयंतीति॥ न च पूर्वोक्तयुक्त्या धर्मत्वेन सुखत्वेन कार्यकारणभावे ल
त्तिरीश्वरे सुखस्य बाधात्। सुखजनकदुःखाभाववत्तिर्वा लक्षणेति वाच्यं। तादृशकार्यकारणभावे मानाभावात्। यद्विशेषयोः
इति व्याप्तेरप्रयोजकत्वात्॥ न च लाघवेन समवायसंबंधेन वाजपेयजन्यविजातीयापूर्वद्वारा वाजपेयादीनां विजातीयसुख
हेतुत्वेनातिप्रसंगभंगो व्यापारस्यापूर्वस्य धर्मत्वेनैव सामान्यतो सुखत्वावच्छिन्नं प्रति हेतुत्वं वाच्यमिति वाच्यं। विजातीयसुख

ई·नि·सु·दि· त्वावच्छिन्नत्वप्रतिविनिगमनाविरहादपिवाजपेयजन्यविजातीयापूर्वीयाणां हेतुत्वात्। नचवाजपेयेनयजेतेत्यत्र तस्यत्रोपस्थितवाजपे
यत्वेनेष्टसाधनत्वस्यबोधनंविनिगमकमुक्तमितिवाच्यं। [redacted] उपस्थित[redacted]नरूपेणोवकारणताबोध
ननियमेप्रमाणाभावात् तद्बोधनस्योत्सर्गिकत्वात्। अन्यथावाजपेयेनयजेतेत्यत्राभेदसंबन्धेनवाजपेयविशिष्टयागत्वेनवाज य३
पेयाभिन्नयागत्वेनवोपस्थितत्वात्तेनापिरूपेणेष्टसाधनताबोधनंस्यादिति। नचैतत्संभवति। लाघवेनवाजपेयत्वेनैवहेतु
त्वादिति। किंचविजातीयापूर्वैसंबन्धेनापिवाजपेयादेःस्वर्गादिपूर्ववृत्तित्वाभावेनविजातीयस्वर्गोपनियतपूर्ववर्त्ति
मेव विजातीयापूर्वजनकसं[redacted]पाभिमानाषिकोयागस्यविजातीयस्वर्गकारणत्वंवाच्यं। तथाचैतादृशकारणत्वसहस्रादिकल्पनेपिस्य म
तत्रलाघवेनविजातीयापूर्वत्वेनैवविजातीयस्वर्ग[redacted]हेतुत्वकल्पनायाउचितत्वमिति। एवंचयागादीनांविहितत्वेनैवरूपेणापूर्वंवृत्ति
तामात्रेणहेतुत्वं। अतिप्रसंगभंगस्तुविजातीयापूर्वीयाणांविजातीय[redacted]सुखहेतुत्वेनैव। अपिचेष्टप्रयोजकतानमेवप्रवर्त्तकंविध्य
र्थोपिदृष्टप्र[redacted]योजकत्वं। तथाचवाजपेयेनयजेतेत्यत्रेष्टप्रयोजकत्वमात्रबोधनान्नयागादेःस्वर्गादिहेतुत्वसंभवः। येन
तस्यविजातीयापूर्वसंबन्धेनकारणत्वेनातिप्रसंगभंगःसंभाव्येतापि॥ अथैवमवच्छेदकतासंबन्धेनसुखत्वावच्छिन्नंप्रतिशरीरत्वे ॥ २॥

कार्य

नवाकरणताया: कल्पनादीश्वरे नित्यसुखबाधः। न च तादृशकारणाभावे मानाभाव इति वाच्यं। लाघवावच्छेदेन सुखाद्यापत्तिवारणाय तस्य
वाच्यत्वात्। न चैवं तुल्ययुक्त्या ज्ञानत्वेन शरीरत्वेन लाघवात्कार्यकारणभावकल्पने नित्यज्ञानमपीश्वरे न सिध्येदिति वाच्यं॥ तत्र कार्य
त्वावच्छिन्नस्य समवायसंबन्धेनोत्पत्तिं प्रति विषयतासंबन्धेन प्रत्यक्षत्वेन हेतुत्वात्तद्गीतकालीनघ्राणजोत्पत्तिपूर्वं जन्यज्ञानस्या
ह संभवात्। नित्यज्ञानसिद्धौ जन्यज्ञानस्यैवानुपपत्त्या शरीरकार्यतावच्छेदकत्वात्। अत्र नित्यं विज्ञानमानन्दं ब्रह्म इत्यादिश्रुतिं त्रि॰ दं
ति.स रेवेश्वरे सुखबाधनं वाच्यं। तत्र च लाघववशात् उक्तकार्यकारणभावबलेन नित्यसुखबाधे सुखजनकस्य दुःखाभाववत्तो वा बाध
नसंभवादि साधनुरक्तत्वादिति चेन्न। शरीरत्वेन सुखत्वेनोक्तकार्यकारणभावे मानाभावात्। अवच्छेदकतासंबन्धेन तदात्मीयविजातीयसुख
त्वावच्छिन्नं प्रति विजातीयचंदनसंयोगस्य हेतुतावश्यकतया एवं तादृशविशेषसामान्यभावेनैव लाघवावच्छेदेन सुखाद्यनापत्तेः। न च त
त्र संयोगवैजात्यं कल्पयित्वा तादृशकार्यकारणभावकल्पने मानाभावः। तथा चावच्छेदकतासंबन्धेन तदात्मीयविजातीयसुखत्वावच्छि
न्नं प्रति चंदनसंयोगत्वेन रूपेण चंदनसंयोगस्य हेतुत्वात्। तस्य च सत्त्वादावपि सत्त्वात् अवच्छेदकतासंबन्धेन तदात्मीयसुखापत्तिवा
रणाय शरीरत्वेन कार्यकारणभावो वश्यक इति वाच्यं। यथाकथंचिच्चंदनसंयोगचंदनघ्राणकसंयोगाद्यशशरीरविजातीयसुखानुत्पत्ते

सुखत्वेन

भा ना भाभिमानस्य २ ते

ई॰ नि॰ मु॰ वि॰ विजातीयचंदनसंयोगत्वेन हेतुत्वावश्यकत्वात्। अन्यदीयशरीरचंदनसंयोगात्तच्छरीरावच्छेदेन तदात्मीयसुखानुत्पन्नोत्तत्वापि मतेन तादृ
शसुखं प्रति विजातीयचंदनसंयोगत्वेन हेतुत्वावश्यकत्वाच्च। न चाभिमानिकसुखस्थले ऽहं विधानि तीर्विजातीयात्सुखहेतुत्वं कार्यकारणा
तयोरवच्छेदकः संबंधः समवाय एव। तत्रावच्छेदकतायाः संबंधत्वेन तदात्मीयत्वप्रवेशगौरवात्। तथा च तादृशसुखस्य शरीरावच्छेदेनै
वस्तुमाघवच्छेदेन चापत्तिवारणाय तादृशी सा शरीरत्वेन सुखत्वेन कार्यकारणाभाव आश्रयकारणतिवाच्यं। तदात्मीयतादृशसुखस्य अन्य
तदात्मीय दात्मीयशरीरावच्छेदेनापत्तिवारणाय तादृशसुखस्यावच्छेदकतासंबंधेनोत्पत्तिं प्रति तदात्मीयतादृशात्मीमानविशेषणस्यावच्छेदकतासं
बंधेन हेतुत्वावश्यकत्वात्। विशेषसामान्यभावादेव तस्तमाघवच्छेदेन तादृशसुखाद्युत्पत्तेरभावादिति। एतेन समवायसंबंधे
न सुखत्वाद्यवच्छिन्नं प्रति तादात्म्यसंबंधेनात्मत्वेन हेतुत्वान्नित्यसुखस्यासंभवः। नित्यज्ञानं प्रति बंधनिरस्तं एवमेव तत्तत्स्य
पास्तं। धर्मविशेषादेः सुखविशेषादिहेतुत्वे नैवात्मनि नित्यसुखाद्युत्पत्तिसंभवेन दृष्टपकृ कार्यकारणाभावेमानाभावात्। समवायी
कारणात्यकारणत्वं तु सामान्यतः कार्यत्वेन द्रव्यत्वेन कार्यकारणाभावेनापि निर्वहतीति केचित्तु। आत्मविशेषगुणत्वावच्छिन्नं प्र
२ आत्मत्वेन तिलाघवादिहेतुत्वं आत्मविशेषगुणत्वं च ज्ञानेच्छा [illegible] धर्माधर्मसुखदुःखसाधारणो जातिविशेषः। स चात्मनिष्ठसमवायीकार ॥३॥

ऽत्र नित्यसुखे स्वरूपं ज्ञानं तदिति नं प्रति ९

त्तानि रूपितकार्यतावच्छेदकतया प्रसिद्धिः। तत्र नित्यज्ञानानुरोधात् जन्यत्वविशेषणस्यावश्यकत्वमिति नित्यसुखबाध्यः। तद्घटितत्वेन हेतुत्वे मानो
ऽसुतरामात्मत्वेन कार्यकारणभावे मानाभावात्। ननु तथापीश्वरे सुखे किं मानं। नित्यविज्ञानमानंदमित्यादिश्रुतिर्नित्यस्येश्वरे बोधनीय मानं
तिवाच्यं। समानविभक्तिकपदानां अभेदान्वयबोधकत्वव्युत्पत्त्या लैब्रह्मणो नित्यविज्ञानानंदाभेदस्यैव तादृशश्रुतिबोध्यत्वनास्तितिचेन्न॥
नं न नित्यज्ञानसुखत्वजाति भ्यां कार्यभयाज्ज्ञानसुखात्मकव्यक्तिस्वीकारात्। नचानंदं ब्रह्मेत्यत्रानंद[illegible]पदे नपुंसकलिंग[illegible]
पपत्तिः। आनंदपदस्य पुंलिंगत्वात्तद्वैतिवाच्यं। श्रुतौ लिंगव्यत्ययस्वीकारात्। यद्वा आनंदपदोत्तरं मत्वर्थकाजस्य स्वीकारात्तत्पदसिद्धिः। न चतया
नंदपदस्यानंदजनकेलक्षणास्तु। मत्वर्थकाजस्य स्वीकारात् जनकत्वस्वरूप एव योगो बाध्यतामितिवाच्यं। जनकत्वस्य गुरुतया समवायस
बंधेनानंदवत्स्यैव लाघवेन श्रुत्या बोधनात्। स पुनरीश्वरनिष्ठानंदो लाघवाद्वा नित्य एव कल्प्यते। न तु प्रागभावध्वंसकल्पनतादृशान
तकारणादिचौरवात्। लाघवेन सुखादेर्धर्मादिजनकतावच्छेदकानिरासेन च तादृशानन्तप्रागभावध्वंसादिकल्पनागौरवस्य फलमु
खत्वाभावात्। एवं चेश्वरः संयोगवान्नित्यत्वानुभिसादीश्वरे संयोगासिद्धेर्न तत्संयोगाप्रागभाव[illegible]वध्वंसतत्संयोगकारणादिकल्पनगौरवात्।
संयोगो नित्य एव सिद्ध्यतीति प्रतिबंदीपरिहासोऽपि न सावकाशः। क्रियाजन्यसंयोगस्थले सामान्यतः संयोगत्वेन विजातीयसंयोगत्वे
न[illegible]नत्वकपालात्मसंयोगत्वेन घटात्मसंयोगत्वेन वा कार्यकारण[illegible]भावकल्पनापत्तेः। न चेश्वरसंयोगोपपत्तौ कृत्स्नतनित्यस्य

ई॰ नि॰ सु॰ वि॰ संयोगांतरस्येश्वरे[illegible]कल्पनए वैगौरवात्। परे तु नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतिर्विज्ञानानंदविशिष्टस्य ब्रह्मणो नित्यत्वं बोधयति। वि
शेषणस्य विज्ञानसुखादेरपि नित्यत्वं बोधयतीति। विशेषणस्य विशेष्यान्वयिनाऽन्वयस्य श्रुतौ व्युत्पन्नत्वात्। अतएवारुणायाएकाहिन्याग
वासोमं क्रीणातीति श्रुतौ आरुणस्य गोविशेषणतया क्रयसाधनत्वबोधः। यथा चैतत्र विशेषणस्यापि स्थापितस्यापि तादृशस्य परत्रान्वयो निरा
बाधः। तथा रत्नप्रभायां लोकावसरे विवेचयिष्याम इत्याहुः। एवमानंदं ब्रह्मणो रूपमित्यत्र शब्दधर्मवाचकत्वे आनंदपदे लिंगव्यत्यय एवं स्वरूप
६ वाचकत्वे तु आनंदयतीति लक्षणया आनंदवत्तो बोधने लिंगव्यत्ययेन शङ्क्या। बोधने मुक्तार्थेवास्त्वसत्यस्वीकारेणोपपत्तिरित्याहुः॥ ईश्वरे
नित्यसुखस्थापने विचारः समाप्तः॥ श्रीः॥ ॐ॥ श्रीः॥ ११०॥

सं३४

५

॥४॥

विग्रहसि

५०

सं० १३११